दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षशुक्लद्वादशी
मार्गशीर्षः १७ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-40 | 1 | दिसम्बर 02, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 ये मादकद्रव्यतस्कराणां विषये सूचनां प्रदास्यन्ति ते १० सहस्रतः ५ लक्षरूप्यकाणां पुरस्कारं प्राप्स्यन्ति, इति मुख्यमंत्रिणः घोषणा

3 राधे-राधे किमर्थं कथयन्ति , एतस्य कः अर्थः ? एषः प्रश्नः पृष्टः आसीत्; भाजपाद्वारा अर्धं चलचित्रं प्रदर्शितम् - मुख्यमंत्री

5 सामसीमहाविद्यालये-गीताजयन्तीमहोत्सवः पालितः

## संसदः शीतकाल-सत्रम् आरभते; विभिन्नान् विषयानधिकृत्य विपक्षस्य कोलाहलेन संसदः उभयसदनं दिवसपर्यन्ताय स्थगिते




**हिमसंस्कृतवार्ताः -** विभिन्नेषु राज्येषु केन्द्रशासितप्रदेशेषु च निर्वाचक-भूमिकायां विशेष-गहन संशोधनम् (एस्. आई. आर्.) इत्यादीनां विषयेषु विपक्षस्य कोलाहलानन्तरं लोकसभायाः कार्य दिवस-पर्यन्ताय स्थगितम् । द्वितीय-स्थगनस्य अनन्तरं अपराह्ने द्वि वादने यदा लोकसभायाः आरम्भः अभवत्, तदा केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः पञ्चविंशत्यधिक द्विसहस्रेत्यस्य मणिपुर-वस्तु-सेवा करं (द्वितीयं संशोधनम्) विधेयक, चर्चायै, अंगीकाराय च प्रस्तुतवती। तदा विपक्षस्य कोलाहलस्य मध्ये ध्वनिमतेन विधेयक स्वीकृतम्। कोलाहल पूर्ण वातावरणे वित्तमन्त्री निर्मला सीतारामनः तम्बाकू तथा तत्सम्बद्धेषु उत्पादेषु उत्पादशुल्कं वर्धयितुं केन्द्रीय उत्पादशुल्कं (संशोधनम्) विधेयकम् विंशति पञ्चविंशति प्रस्थापयत्। विपक्षस्य विरोधस्य मध्ये, पीठासीन अधिकारी विरोध प्रदर्शन-रतेभ्यः सदस्येभ्यः सभायाः कार्याचरणाय अनुमतेः आग्रहं कृतवान्। अनवरत कोलाहलानन्तरं सभा स्थगिता। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् शीतकालसम्मेळनम् न केवलं अनुष्ठानमस्ति अपितु भारतम् विकासं प्रति नेतुं प्रयत्नानपि प्रवर्धयतीति । संसदः शीतकालसम्मेलनात् प्राक् प्रसारमाध्यमान् सम्बोधयन् श्रीमोदी अवदत् यत्, अद्य भारतस्य आर्थिकवृद्धिः उल्लेखनीयं औन्नत्यं अवाप्नोत् । सः अवदत् यत्, एषा गतिः भारतं विकसितराष्ट्र कारयितुं नूतनं आत्मविश्वासं जनयति । प्रधानमन्त्री मोदी सर्वेभ्यः पक्षेभ्यः आग्रहं कृतवान् यत् शीतकलीनसत्रं पराजयात् उत्पन्नायाः कुण्ठायाः युद्धक्षेत्रं न भवेत्, न च विजयात् जातस्य दम्भस्य रङ्गमञ्चरूपेण भवेदिति। प्रधानमन्त्री मोदी उक्तवान् यत् सदस्यैः युवभ्यः, युव-संसदसदस्येभ्यश्च अवसराः दातव्याः ।

## राष्ट्रपतिः द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्रमोदी च नागालैण्ड्-राज्यस्य जनेभ्यः राज्य-दिवसस्य शुभाशयाः प्रदत्तवन्तौ

**हिमसंस्कृतवार्ताः -** राष्ट्रपतिः द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्रमोदी च नागालैण्ड्-राज्यस्य जनेभ्यः राज्य-दिवसस्य शुभाशयाः प्रदत्तवन्तौ। सामाजिक अन्तरजालीये सन्देशे राष्ट्रपतिः अवदत् यत् राज्यं समृद्ध-संस्कृत्या, अनन्त-प्राकृतिकसौन्दर्येण च अनुग्रहीतम् अस्ति। सा अवोचत् यत् तस्य जनजातीयविविधता, अद्वितीयाः परम्पराः च गौरवस्य स्रोतः अस्ति । राष्ट्रपतिः राज्यस्य जनानां कृते शान्तियुतस्य, समृद्धस्य, प्रगतिशीलस्य च भविष्यस्य कृते शुभाशयाः प्रेषितवती। प्रधानमन्त्री श्रीमोदी गौरवपूर्णं नागा-संस्कृतिम् अधोरेखितवान्, सेवायाः, साहसस्य, अनुकम्पायाः च मूलं वर्णयन्, सम्पूर्णं देशे व्यापकरूपेण प्रशंसिता च। आगामिषु वर्षेषु राज्यं समृद्ध्या प्रगत्या च अग्रे गच्छतु इति प्रधानमन्त्रिणा कामना कृता।

## केन्द्रीय गृहमन्त्री अमितशाहः अपि शुभाशयाः अयच्छत्

केन्द्रीय गृहमन्त्री अमितशाहः नागालैण्ड्-राज्यस्य प्रजाभ्यः राज्य-स्थापना दिवसस्य शुभाशयाः अयच्छत्। सामाजिक-प्रसार माध्यमे, श्रीशाहः अवदत् यत् राज्यस्य जीवन्तपरम्पराः, तस्य जनानां स्थितिस्थापकभावाश्च राष्ट्रस्य सांस्कृतिक संरचनां सुदृढां कुर्वन्ति। सः नागालैण्ड्-राज्ये शान्तिः, प्रगतिः, समृद्धिश्च भवेदिति प्रार्थयत् ।

## इन्दिरागान्धी-अन्तार्राष्ट्रीयविमानस्थानकेन भारतस्य प्रथमं विमानस्थानकं जातम् येन "जल-सकारात्मक-पदवीं"प्राप्तम्



**हिमसंस्कृतवार्ताः -** नवदेहलीस्थे इन्दिरागान्धी-अन्तार्राष्ट्रीयविमानस्थानकं (IGIA) देशस्य प्रथमं विमानस्थानकं जातम् येन पर्यावरण-अनुकूलतायाः कारणात् जल-सकारात्मक-पदवीं प्राप्तवान् । अस्य यात्रिकक्षमता प्रतिवर्षं ४ कोटिभ्यः अधिका भवति । एतस्याः उपलब्धेः विषये वदन् आईजीआईए-संस्थायाः मुख्यकार्यकारी अधिकारी विदेहकुमारजयपुरियरः अवदत् यत् जलसकारात्मकः भवितुं पर्यावरणप्रबन्धनदृष्ट्या प्राकृतिकसंसाधनानाम् उत्तरदायीरूपेण उपयोगाय, विमाननमूलसंरचनायाः भविष्याय च गहनप्रतिबद्धतां प्रदर्शयति। सः अवदत् यत् एषा उपलब्धिः आईजीआई-विमानस्थानकस्य शून्य-उत्सर्जन-विमानस्थानकत्वेन दीर्घकालीनस्थानं सुदृढं कर्तुं प्रमुखं सोपानम् अस्ति। जयपुरियारमहोदयः अवदत् यत् जलसकारात्मकता न केवलं प्राकृतिकसंसाधनानाम् उपरि अस्माकं निर्भरतां न्यूनीकरोति अपितु अस्माकं पर्यावरणस्य स्थायित्वं सुदृढं करोति।

## केन्द्र-सर्वकारः लोक-प्रशासनस्य उत्कृष्टतायाः कृते प्रधानमन्त्री पुरस्कारार्थं योजनायाः अनुमोदनम् अकरोत्

**हिमसंस्कृतवार्ताः -** केन्द्र-सर्वकारेण लोक-प्रशासनस्य उत्कृष्ट-सेवायाः कृते प्रधानमन्त्री-पुरस्कारस्य योजना, विंशति पञ्चविंशति अनुमोदिता अस्ति। कार्मिक-लोक-परिवाद-निवृत्तिवेतन-मन्त्रालयः अवदत् यत् एतेषां पुरस्काराणाम् उद्देश्यं सम्पूर्णं देशे नागरिकसेवायाः योगदानस्य परिचयः भवेत् ।

## सुभाषितम्

**ऋणं मित्रान्न कर्तव्यं,**
**न देयं चापि मित्रके।**
**प्रीतिच्छेदकरी ज्ञेया,**
**यस्माद्वै ऋणकर्तरी।।**
**-महासुभषितसंग्रह**

भावार्थः- अपने मित्रों से कभी भी ऋण (उधार) नहीं लेना चाहिए, न ही अपने किसी मित्र को देना चाहिए क्योंकि ऋण लेना और देना ये दोनों ही परिस्थितियां मित्रता के सूत्र को कैंची द्वारा काटे जाने के समान होती हैं।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति ।
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## गीताजयन्त्याः अवसरे सम्पूर्णदेशवासिभ्यः शुभाशयाः प्रदत्ताः प्रधानमन्त्रिणा नरेन्द्रमोदिना

**हिमसंस्कृतवार्ताः -** प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रीमद्भगवद्गीतायाः आगमनेन सम्बद्धस्य गीताजयन्त्याः अवसरे सम्पूर्णदेशवासिभ्यः शुभाशयाः प्रदत्ताः। सामाजिक माध्यमेन श्रीमोदी अवदत् यत् कर्तव्यपूर्ति प्रति अमूल्य-सन्देशैः अलङ्कृतः अयं दिव्यग्रन्थः भारतीय कुटुम्बे, सामाजिक-आध्यात्मिक जीवने च अत्यन्तं विशिष्टं स्थानं धत्ते। सः अवदत् यत् गीतायाः दिव्यपदानि प्रत्येकं जनाय निस्वार्थकार्यार्थं निरन्तरं प्रेरयन्ति ।



# ये मादकद्रव्यतस्कराणां विषये सूचनां प्रदास्यन्ति ते १० सहस्रतः ५ लक्षरूप्यकाणां पुरस्कारं प्राप्स्यन्ति, इति मुख्यमंत्रिणः घोषणा

**हिमसंस्कृतवार्ताः - धर्मशाला।** मुख्यमंत्री सुखविंदरसिंहसुक्खू सोमवासरे कांगड़ाजनपदस्य धर्मशालायां चिट्टाविरोधी-जागरूकता वॉकथॉनस्य नेतृत्वं कृतवान्। यात्रा दाड़ी-भूमौ आरब्धा, पुलिस-भूमौ च समाप्ता, यत्र विद्यालयस्य छात्राः, विभिन्नवर्गस्य जनाः च बहुसंख्याकाः भागं गृहीतवन्तः वाकथॉन्-क्रीडायाः समये बालकाः मादकद्रव्यविरोधी घोषान् उद्घोषयन्तः ऊर्जया, उत्साहेन च मार्गं कृतवन्तः । मुख्यमन्त्री स्वयं बालकैः सह दाड़ीभूमौ पुलिसक्षेत्रं यावत् अगच्छत्। अनेकस्थानेषु सः तैः सह संवादं कृत्वा अस्मिन् युद्धे सक्रियभूमिकां कर्तुं प्रोत्साहयति स्म । बालकाः अपि उत्साहेन तेन सह सेल्फी इति गृहीतवन्तः ।पुलिस-भूमौ प्राप्ते मुख्यमन्त्री मादकद्रव्यतस्कर-सङ्घस्य कृते कठोरसचेतनाम् अयच्छत् यत् देवभूमौ मादकद्रव्य-तस्कराणां स्थानं नास्ति इति । सः अवदत् यत् पीआईटी, एनडीपीएस-अधिनियमः वर्षाणि यावत् कार्यान्वितः नासीत्, परन्तु वर्तमानराज्यसर्वकारेण तत् प्रभावीरूपेण कार्यान्वितम्, अधुना यावत् च अस्मिन् विधानस्य अन्तर्गतं ४६ प्रमुखाः मादकद्रव्य-तस्कराः निरुद्धाः सन्ति सः अवदत् यत् मादकद्रव्यस्य दुरुपयोगद्वारा अर्जितं प्रत्येकं अवैधधनं गृहीतं भविष्यति, राज्यसर्वकारेण च एतत् अधिनियमं पूर्णतया कार्यान्वितं कृत्वा मादकद्रव्यस्य दुरुपयोगे सम्बद्धानां विरुद्धं कठोरकार्याणि सुनिश्चितानि। अद्यावधि ₹46 कोटिरूप्यकाणां अवैधसम्पत्त्याः ग्रहणं कृतमस्ति।मुख्यमन्त्री अवदत् यत् एषः नूतनः हिमाचलप्रदेशः अस्ति, यावत् मादकद्रव्यस्य दुरुपयोगस्य प्रत्येकं लेशं न निराकृतं तावत् युद्धं निरन्तरं भविष्यति। एतद् न केवलं मादकद्रव्यस्य तस्कराणां विरुद्धं युद्धं, अपितु तेषां सम्पूर्णं जालं मादकद्रव्यतस्करान् च उत्थापयितुं निर्णायकः संघर्षः अस्ति। सः अवदत् यत् यः कोऽपि अस्माकं भविष्यत्सन्ततीन् मादकद्रव्याणां दुरुपयोगं कर्तुं प्रयतते सः साक्षात् कारावासं गमिष्यति, तेषां क्रीडा तत्रैव समाप्ता भविष्यति।सुखविन्दरसिंहसुक्खुः अवदत् यत् एएनटीएफ, एसटीएफ, पुलिस, शिक्षा, स्वास्थ्यं, सामाजिकन्यायविभागाः अपि च प्रत्येकः नागरिकः अधुना मादकद्रव्यस्य दुरुपयोगस्य विरुद्धं एकीकृतः तिष्ठति। सः अवदत् यत् सः अद्य अत्र न मुख्यमन्त्रीरूपेण, अपितु युनां भविष्यस्य रक्षणार्थं कवचरूपेण उपस्थितः अस्ति। सः स्पष्टीकरोति यत् एतद् युद्धं केवलं अभियानमेव एव नास्ति, अपितु इदानीं मिशनमोड् प्रविष्टस्य युनां उज्ज्वलभविष्यस्य रक्षणार्थं व्यापकं युद्धम् अस्ति।

## चिट्टातस्कराणां विषये सूचनां प्रदातृभ्यः पुरस्कारः

मुख्यमन्त्री उक्तवान् यत् सर्वकारस्य पुरतः अनेकानि आह्वानानि आसन् तेषां सम्मुखीकरणं च साहसेन अकरोत्। प्रमुखमादकद्रव्यतस्कराणां, अन्तरराज्यदलानां च मेरुदण्डं भङ्गयितुं सर्वकारः सफलः अभवत् । सः समाजस्य सर्वेभ्यः वर्गेभ्यः सहकार्यस्य आह्वानं कृत्वा चिट्टाविषये सूचनां प्रकटी-कृत्वा पुरस्कारं घोषितवान्। सः अवदत् यत् चिट्टा-इत्यस्य विषये सूचनाप्रदातृभ्यः द्विग्रामपर्यन्तं सूचनां १०,००० रुप्यकाणि, पञ्चग्रामस्य कृते २५ ००० रुप्यकाणि २५ ग्रामस्य कृते ५०,००० रुप्यकाणि, १ किलोग्रामस्य कृते ५ लक्षरूप्यकाणि, १ किलोग्रामात् अधिकमात्रायां चिट्टा-इत्यस्य सूचनायाः कृते १० लक्षरूप्यकाणि च पुरस्कारराशिः प्रदत्ता भविष्यति। सः अपि अवदत् यत् बृहत्-दलानां विषये सूचनाः प्रदातुं ५ लक्ष-रूप्यकात् अधिकाः पुरस्कारराशिः भविष्यति।

# लोकसभायां विपक्षस्य मध्य- कोलाहले मणिपुरस्य वस्तु-सेवा-करस्य द्वितीय-संशोधनविधेयक 2025 स्वीकृतम्



**हिमसंस्कृतवार्ताः -** संसदः शीतकालीन सत्रस्य आरम्भः अभवत्। अस्मिन् सत्रे ऊनविंशति-दिवसेषु आहत्य पञ्चदश-उपवेशनानि भविष्यन्ति । प्रातः एकादशवादने यदा लोकसभायाः आरम्भः अभवत् तदा लोकसभायाः अध्यक्षः ओम बिरला-वर्यः धर्मेन्द्रस्य, कर्नल (निवृत्तः) सोना राम चौधरी वर्यस्य, प्रो. विजय कुमार मल्होत्रा वर्यस्य, रवि नाईकस्य च निधने श्रद्धांजलिं समर्पितवान्। यदा लोकसभायां प्रश्नकालः प्रारब्धः तदा विपक्षस्य सदस्याः मतदातृ-सूच्यां विशेष-गहन-संशोधनम् इत्यादीन् विविधविषय-अवलम्ब्य उद्घोषणं कर्तुम् आरभन्त। लोकसभायाः अध्यक्षः ओम बिरला-वर्यः विरोध प्रदर्शने संलिप्तानां सदस्यानां व्यवहारे असन्तुष्टिं प्रकटितवान्, सः अवदत् यत् सभायाः कार्येषु विघ्नं न उचितम्। निवेदनानन्तरम् अपि विपक्षस्य सदस्याः स्वप्रतिरोधं प्रदर्शितवन्तः तदनन्तरम् अध्यक्षः मध्याह्ने द्वादशवादन-पर्यन्तं सभां स्थगितवान्। राज्यसभया सभापतुः सी. पी. राधाकृष्णन् वर्यस्य स्वागतं विहितम्, येन प्रथमवारं राज्यसभायाः अध्यक्षता कृता। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् राधाकृष्णन् वर्यस्य सामान्य जीवनात् उपराष्ट्रपतिपदं प्रति आगमनम् देशस्य लोकतन्त्रस्य वास्तविकशक्तिं प्रतिबिम्बयति ।श्रीमोदी अवदत् यत्, तस्य मार्गदर्शने, सभा चर्चा करिष्यति, अग्रे गन्तुं महत्त्वपूर्णानि निर्णयानि च स्वीकरिष्यति । उपसभापतिः हरिवंशः अपि राधाकृष्णन् वर्यस्य स्वागतम् अकरोत् ।

# प्रधानमन्त्रि-विश्वकर्मा-योजनान्तर्गतं द्विसप्ततिलक्षोत्तर-द्विकोटि-संख्यकाः शिल्पिनः नामाङ्‌किताः- केन्द्रसर्वकारः





**हिमसंस्कृतवार्ताः -** सर्वकारः अवदत् यत् अद्यावधि प्रधानमन्त्रि-विश्वकर्मा-योजनान्तर्गतं द्विसप्ततिलक्षोत्तर-द्विकोटि-संख्यकाः शिल्पिनः नामाङ्किताः सन्ति । कार्यं कुर्वताम् अष्टादश-पारम्परिक व्यापाराणां शिल्पिभ्यः शिल्पिकाभ्यश्च समग्रसमर्थनाय पञ्चवर्षावधिक-कालपर्यन्ताय त्रयोविंशत्युत्तरद्विसहस्र-तमे वर्षे योजनेयं आरब्धा। सूक्ष्म-लघु-मध्यम-उद्यम-राज्यमन्त्री शोभा करन्दलाजे राज्यसभायां एकस्य प्रश्नस्य लिखितोत्तरे एतत् सूचितवती। सा अवोचत् यत् त्रयोविंशति लक्षतः अधिकाः लाभार्थिनः कौशलप्रशिक्षणं प्राप्तवन्तः, सप्तलक्ष लाभार्थिनः त्रयोविंशति कोटिरूप्यकाणि डिजिटल्-प्रोत्साहनञ्च प्राप्तवन्तः ।

# HP Vidhansabha Session - हिमाचले अधिकारिणां कर्मचारिणां च कृते स्थानान्तरणनीतिः निर्मिता भविष्यति - मुख्यमंत्री सुक्खुः

**हिमसंस्कृतवार्ताः - धर्मशाला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् राज्ये अधिकारिणां कर्मचारिणां च कृते स्थानान्तरणस्य नीतिः शीघ्रमेव निर्मिता भविष्यति। सम्प्रति पूर्वसर्वकारस्य कार्यकाले स्थापिता नीतिः प्रचलति । एषा नीतिः शीघ्रमेव परिवर्तिता भविष्यति। मुख्यमन्त्री सोमवासरे प्रश्नसमये भाजपाविधायकस्य लोकेन्द्रकुमारस्य प्रश्नस्य उत्तरे एतां स्थितिं स्पष्टीकृतवान्। विधायकः राज्ये सर्वकारीयकर्मचारिणां वर्तमानस्थानांतरणनीतेः विषये पृष्टवान् आसीत्।एकस्मात् स्थानात् अन्यस्मिन् स्थाने स्थानान्तरणस्य के मापदण्डाः सन्ति ?राज्ये परस्परसहमत्या स्थानान्तरणं भवति वा न वा ?विगतषड्मासेषु परस्परसहमत्या कति कर्मचारिणः स्थानान्तरिताः, एतेषां स्थानान्तरणस्य आधारः कः आसीत्? तस्य प्रतिक्रियारूपेण मुख्यमन्त्री अवदत् यत् एषः प्रश्नः विस्तृतः अस्ति अतः सूचनासङ्ग्रहाय समयः भवति।

**सामान्य-व्यत्ययानन्तरं अबाधित एव आसीत् प्रश्नकालः**-हिमाचलप्रदेशस्य विधानसभायाः शिशिरसत्रस्य चतुर्थे दिने सोमवासरे अपराह्ने २:०० वादने मृदुव्यत्ययानन्तरं कार्यविधिः सुचारुतया आरब्धा। प्रश्नकालः घोषितमात्रेण विपक्षस्य नेता जयरामठाकुरः उत्थाय राज्यविधानसभाध्यक्षं कुलदीपसिंह पठानियां कस्मिंश्चित् विषये वक्तुं अनुमतिं याचितवान्। विधानसभाध्यक्षः पठानिया प्रश्नकालस्य अनन्तरं समयं दातुं प्रस्तावम् अयच्छत्। जयरामठाकुरः पुनः पुनः वक्तुं अवसरं प्राप्तुं स्वस्य आग्रहं कृतवान् । सभापतिः अवदत् यत् अद्यैव एतादृशी व्यवस्था कृता यत् सदस्येभ्यः प्रश्नकालस्य अनन्तरमेव अन्यविषयेषु वक्तुं अवसरः दीयते।

# राधे-राधे किमर्थं कथयन्ति , एतस्य कः अर्थः ? एषः प्रश्नः पृष्टः आसीत्; भाजपाद्वारा अर्धं चलचित्रं प्रदर्शितम् - मुख्यमंत्री



**हिमसंस्कृतवार्ताः - धर्मशाला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः धर्मशालायां आयोजितायां वाकथॉन्-क्रीडायां मीडिया-सञ्चारमाध्यमेषु वदन् अवदत् यत् सनातनधर्मस्य परिभाषा तैः न उपदेष्टव्या ये स्वयं मतप्राप्त्यर्थं सनातनधर्मस्य राजनीतिरूपेण उपयोगं कुर्वन्ति। सनातनधर्मस्य अर्थः सत्कर्मकरणं, परसेवा, निर्धनानाम् अनुग्रहः, दरिद्राणां प्रति दयालुता च। धर्मशालायां काश्चन बालिकाः मिलिताः अहं तान् पृष्टवान् यत् ताः किमर्थं राधे-राधे इति वदन्ति, तस्य अर्थः किम् इति। तथापि भाजपा द्वारा अर्थं न व्याख्याय अर्धभागयुतं चलिचित्रं प्रदर्शितम्।मुख्यमन्त्री उक्तवान् यत् अयोध्यायां यदा राममन्दिरस्य प्रतिष्ठा अभवत् तदा भाजपासर्वकारः केन्द्रे आसीत्, तेन अर्धदिवसस्य अवकाशः घोषितः। तथापि हिमाचलप्रदेशे काङ्ग्रेससर्वकारः आसीत्, राज्ये वयं पूर्णदिवसस्य अवकाशस्य घोषणां कृतवन्तः । कन्यापूजनं, गोवर्धनपूजा इत्यादयः अस्माकं कृते बाल्यकालात् एव उपदिष्टाः, न केवलं अद्यत्वे। अतः सनातनधर्मस्य परिभाषा तैः न उपदेष्टव्या ये स्वयं सनातनधर्मस्य राजनीतिरूपेण मतप्राप्त्यर्थं उपयोगं कुर्वन्ति। राज्ये भाजपायाः पार्श्वे कोऽपि विषयः नास्ति। तेषां एकमेव कार्यं वर्तते यत् यत्र अहं गच्छामि तत्र मम यात्रायाः वा बालकैः सह मेलनस्य वा चलचित्र-निर्माणम् इति। भाजपा हिमाचलप्रदेशस्य धनं लुण्ठितवती अस्ति।मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् पञ्चवर्षेषु द्विइञ्जिनसर्वकारेण केवलं राज्यं लुण्ठितम्। कोटिरूप्यकाणां सार्वजनिकधनस्य अपव्ययः एकस्य अल्पस्य कृते अपि अभवत्, जनसमूहः अपि तत् न अवगच्छति स्म । ४५०० बीघाभूमिः १.२२ कोटिरूप्यकाणां कृते अनुकूलितपैकेज् इत्यस्य नामधेयेन प्रदत्ता, यस्य मूल्यं प्रायः ५००० कोटिरूप्यकाणि आसीत् । तस्मिन् भूमिभागे नूतनं नगरं निर्मातुं शक्यते स्म । भाजपायाः पार्श्वे विषयाः अवशिष्टाः न सन्ति, अतः ते एतेषु विषयेषु विधानसभायां चर्चां न कुर्वन्ति। ते केवलं एतेषां विषयेषु चर्चां कुर्वन्तः एव उपविशन्ति।आल्टो-कारयानस्य प्रश्नस्य विषये मुख्यमन्त्री अवदत् यत् सः स्वकीय-उपार्जनेन एव तत् क्रीतवान् । सः सर्वदा बजटस्य समये आल्टो-यानेन गच्छति । सः दरिद्रकुटुम्बात् आगतः अतः सः निर्धनकुटुम्बानां दुःखं अवगच्छति। मुख्यमन्त्रीत्वात् आरभ्य अहं सर्वदा चिन्तयामि यत् अहं यत् किमपि अर्जयामि तत् जनसामान्यं प्रति सहभागिकरिष्यामि इति। मुख्यमन्त्रीत्वात् परं मया किमपि सम्पत्तिः न प्राप्ता, न च मया होटलं निर्मितं, भूमिः अपि न क्रीता। समाजेन यत् दत्तं तत् समाजं प्रति प्रत्यर्पयिष्यामि इति चिन्तया अहं सर्वदा कार्यं करोमि। मुख्यमन्त्री जनानां मध्ये भूत्वा अद्य तैः सह वार्ता कर्तव्या।

# यः दलाय समयं दास्यति सः सङ्घटने स्थानं प्राप्स्यति - विनयकुमारः कांगेसाध्यक्षः



**हिमसंस्कृतवार्ताः - शिमला।** राज्यकाङ्ग्रेसस्य अध्यक्षः विनयकुमारः अवदत् यत् पीसीसी, जिला, खण्डस्तरस्य प्रमुखदायित्वं तेभ्यः नेतृभ्यः दीयते ये सङ्घटनात्मककार्यं प्रति स्वसमयं पूर्णतया समर्पयितुं शक्नुवन्ति, ये च सर्वान् स्वैः सह नेतुं शक्नुवन्ति। सः अवदत् यत् युवभिः महिलाभिः च सहितं समर्पिताः दलकार्यकर्तारः विशेषविचारं प्राप्नुयुः। सङ्घटनस्य भविष्यस्य रणनीत्याः विषये चर्चां कृत्वा अन्तिमरूपेण निर्धारयितुं शीघ्रमेव दलस्य वरिष्ठनेतृभिः कार्यकर्तृभिः सह सभा भविष्यति। सः सर्वेभ्यः दलनेतृभ्यः कार्यकर्तृभ्यः च एकीकृत्य पूर्णसमर्थनं दातुं आग्रहं कृतवान् । सः अवदत् यत् वरिष्ठनेतारः संस्थायाः मार्गदर्शनं करिष्यन्ति तथा च दलस्य कार्यकर्तृभिः सह स्कन्धेन स्कन्धं धृत्वा संस्थां सुदृढं कर्तुं कार्यं करिष्यन्ति, राज्यस्य काङ्ग्रेससर्वकारस्य नीतीनां जनसामान्यं प्रति प्रसारणं सुनिश्चितं करिष्यन्ति।दलस्य मुख्यालये राजीवभवने विलम्बेन रात्रौ यावत् मिलितुं आगतानां दलनेतृणां कार्यकर्तृणां च कृतज्ञतां प्रकटयन् विनयकुमारः अवदत् यत् सङ्घटनं सुदृढं कर्तुं सः सर्वैः दलस्य वरिष्ठनेतृभिः सह सभाः करिष्यति, तेषां अनुभवं, परामर्शं, मार्गदर्शनं च याचयिष्यति, तथा च संस्थायाः सुव्यवस्थितीकरणाय कोऽपि शिलाखण्डः अपरिवर्तितः न त्यक्ष्यति। सङ्घटनेन सह सम्बद्धानां सहकारिणां महत्त्वपूर्णदायित्वं दीयते। शीघ्रमेव बूथस्तरात् राज्यस्तरपर्यन्तं नूतना कार्यकारिणीसमितिः निर्मिता भविष्यति। काङ्ग्रेसपक्षस्य सुदृढीकरणाय प्रत्येकस्मिन् विधानसभाक्षेत्रे युद्धसदृशं अभियानं प्रारभ्यते। विनयकुमारः राज्यसर्वकारस्य त्रिवर्षीये वार्षिकोत्सवे मण्डीनगरे ११ दिसम्बर् दिनाङ्के आयोजिते काङ्ग्रेसस्य जनसंकल्पसम्मेलने उत्साहेन भागं ग्रहीतुं पार्टीकार्यकर्तृभ्यः आह्वानं कृतवान्। सः अवदत् यत् गतत्रिवर्षेषु सर्वकारस्य जनकल्याणनिर्णयाः, आगामिवर्षद्वयस्य सर्वकारस्य दृष्टिः च सम्मेलने जनानां समक्षं प्रस्तुता भविष्यति। अतः अस्मिन् सम्मेलने राज्यस्य यथासंभवं जनान् सम्मिलितुं दलकार्यकर्तृणां महत्त्वपूर्णं दायित्वं स्यात्।

# राज्यपालः शिवप्रतापशुक्लः अपि एस.आइ.आर इत्यस्मिन् सम्मिलितः



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**हिमाचलप्रदेशस्य राज्यपालः शिवप्रतापशुक्लः स्वपत्न्या जानकीशुक्ला इत्यनया सह सोमवासरे उत्तरप्रदेशस्य गोरखपुरं गत्वा मतदातासूचीनां विशेषसघनपुनरीक्षण-अभियानस्य अन्तर्गतं प्रपत्राणि अपूरयत्। आयोजनस्य कालखण्डे सः मतदानकेन्द्रस्तरस्य अधिकारिभिः (बीएलओ) सह मिलित्वा प्रचलति सत्यापनकार्यस्य अवलोकनं कृतवान्। राज्यपालः पारदर्शिता, सटीकता, समावेशी च सुनिश्चित्य निर्वाचनव्यवस्थायाः प्रयत्नस्य प्रशंसाम् अकरोत् । अस्मिन् अवसरे वदन् राज्यपालः शुक्लः अवदत् यत् मतदातारः लोकतन्त्रस्य सशक्ततमाः स्तम्भाः सन्ति, लोकतान्त्रिकप्रक्रियायाः सुदृढीकरणाय च प्रत्येकस्य नागरिकस्य निर्वाचनसूचौ समावेशः अत्यावश्यकः अस्ति।सः अवदत् यत् मतदानस्य अधिकारः नागरिकेभ्यः राष्ट्रस्य भविष्यस्य निर्माणस्य शक्तिं ददाति, अतः कोऽपि योग्यः व्यक्तिः निर्वाचनसूचिकातः बहिः न त्यक्तव्यः। राज्यपालः सर्वेभ्यः नागरिकेभ्यः विशेषतः युवभ्यः, महिलाभ्यः, प्रथमवारं मतदातृभ्यः च आह्वानं कृतवान् यत् ते अस्य विशेषसत्यापन-अभियानस्य पूर्णं लाभं गृह्णन्तु, तेषां नामानि निर्वाचनसूचौ समाविष्टानि इति सुनिश्चितं कुर्वन्तु।

# पति-पत्न्योः मध्ये हास परिहासम्

भार्यया सह परिहासं विचारेण विना मास्तु 🤣😅

पतिः🤔 - यदि भवत्याः सम्मुखे काऽपि समस्या आगमिष्यति, तर्हि भवती किं करिष्यति?

पत्नी- यदा यदा मम जीवने काऽपि समस्या भवति तदा अहं भवन्तं सदैव पश्यामि!

पतिः- 🙂 - किमर्थम्?

पत्नी- भवतः अपेक्षया मम अधिका समस्या अस्ति वा- भवतः सम्मुखे तु मां सर्वाः समस्याः लघ्व्यः दृश्यन्ते 😂🤣😅

पतिः 😡😡😡😡😡

# शिवगङ्गा-नगरे दुर्घटनायां विषये प्रधानमन्त्रिणा नरेन्द्रमोदिना शोकः प्रकटितः

**हिमसंस्कृतवार्ताः -** तमिलनाडुराज्यस्य शिवगङ्गा-नगरे आकस्मिक दुर्घटनायां मृतानां जनानाम् विषये प्रधानमन्त्रिणा नरेन्द्रमोदिना शोकः प्रकटितः। सः व्रणिताः शीघ्रं स्वस्थाः भवेयुः इति आशां प्रकटितवान्। प्रधानमन्त्रिणा प्रत्येकं मृतानां निकटवर्तिने प्रधानमन्त्री राष्ट्रिय सहाय्य कोषात् द्विलक्षरूप्यकाणां अनुग्रहधनस्य घोषणा अपि कृता। व्रणितेभ्यश्च पञ्चाशत्- सहस्ररूप्यकाणि दीयन्ते ।

# संस्कृतभारतीद्वारा श्रीवामदेवसंस्कृतमहाविद्यालये श्रीमद्भगवद्गीताजयन्त्याः समायोजनम्



**हिमसंस्कृतवार्ता बांदा ||** पञ्चविंशत्युत्तरद्विसहस्रतमे कृष्टाब्दे द्वादशमासस्य प्रथमदिनाङ्के सोमवासरे बान्दानगरे कानपुरप्रान्तसंस्कृतभारत्याः श्रीवामदेवसंस्कृतमहाविद्यालयस्य च संयुक्तप्राबन्ध्येन श्रीमद्भगवद्गीताजयन्त्याः कार्यक्रमायोजनं समपद्यत। कार्यक्रमस्य समारम्भः मङ्गलाचरणेन दीपप्रज्वालनेन च अभवत्। आदौ गुरुकुलस्य छात्राः वैदिकं मङ्गलाचरणं चक्रुः। तदनन्तरं विद्यालयस्य प्रधानाध्यापकेन डॉ०नरवदेनारायणदीक्षितेन संस्कृतभारत्याः प्रान्तमन्त्रिणा डॉ. रत्नेशत्रिवेदिना च दीपः प्राज्वाल्यत। विद्यालयस्य सर्वैः वटुभिः शिक्षकैश्च श्रीमद्भगवद्गीतायाः द्वादशाध्यायस्य पारायणं व्यधायि। पुनश्च विद्यालयस्य वरिष्ठप्राध्यापकः डॉ०इच्छारामपाठकः श्रीमद्भगवद्गीतायाः माहात्म्यं प्राकाशयत्। डॉ०मनोजमहोदया छात्रान् श्रीमद्गीतां स्वजीवने अवतारयितुं प्रैरयत्। मुख्यवक्तृरूपेण व्याकरणविभागाध्यक्षः डॉ०त्रिवेदीरत्नेशः श्रीमद्भगवद्गीतां जीवनप्रबन्धनं निगदन् जीवनशैल्याः विविधानि सूत्राणि व्याकरोत्। सः अकथयत् यत् श्रीमद्भगवद्गीता अस्मभ्यं जीवनस्य प्रत्येकस्मिन् मार्गे जीवनकलां शिक्षयति। श्रीमद्भगवद्गीता केवलं धार्मिकग्रन्थः न अपि तु मानवजीवनस्य कुञ्जिकारूपेण भगवता स्वयं स्वमुखात् प्रोक्ता अस्माकं सर्वेषां समक्षं प्रस्तुता। अद्य अस्माभिः स्वयं स्वसन्तानाश्च न केवलं गीतां पठितुम् अपि तु तां जीवने धारयितुं प्रेरणीयाः। यथा भगवान् श्रीकृष्णः अर्जुनं स्वकर्मणि प्रैरयत् तथैव सुखदुःखयोः समभावं रक्षितुं श्रीमद्भगवद्गीता अस्मभ्यं प्रेरणाम् प्रयच्छति। सम्पूर्णे कार्यक्रमे सर्वेषां शिक्षकाणां छात्राणां च सहयोगः आसीत्। अस्मिन् अवसरे विद्यालयस्य सर्वे शिक्षकाः अजयकुमारसिंहः आचार्यपाण्डेयअभयकुमारः, विकासः, शरदः, सूर्यप्रकाशः, इत्यादयः सर्वे विद्यार्थिनः कर्मचारिणः जनप्रतिनिधयः तथा संस्कृतभारत्याः कार्यकर्तारश्च उपस्थिताः आसन्।

# कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालये साडम्बरं गीताजयन्त्युत्सवः परिपालितः



**हिमसंस्कृतवार्ताः- जगदीश डाभी।** प्रतिवर्षं मार्गशीर्षे मासे शुक्लैकादश्यां तिथौ आभारतं गीताजयन्त्युत्सवः परिपाल्यते इति सर्वविदितमेव। तामेव रीतिम् अनुसृत्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याणाम् आदेशानुसारेण अस्मिन्नपि वर्षे (२०२५ तमक्रीस्ताब्दे) दिसम्बरमासस्य प्रथमे दिनाङ्के मार्गशीर्ष-शुक्लैकादशीतिथौ सोल्लासं कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालये गीताजयन्त्युत्सवः परिपालितः। अनुष्ठानस्य अस्य अध्यक्षाः आसन् महाविद्यालयस्य भारप्राप्तप्राचार्याः डॉ ० अमरेन्द्रकुमारमिश्रमहाभागाः। तेषाम् अध्यक्षतायाम् अनुष्ठानमिदं सुष्ठु सम्पन्नम्। अनुष्ठानस्य अस्य आरम्भे अध्यक्षसमेताः सर्वेऽपि शिक्षकाः छात्राः शिक्षाकर्मिणश्च गीतारूपिण्याः भगवत्याः वन्दनं पुष्पाञ्जलिप्रदानं च कृतवन्तः। ततः अनुष्ठानेऽस्मिन् सम्मिलिताः सर्वेऽपि एककण्ठेन गीतायाः पुरुषोत्तमयोगाख्यस्य पञ्चदशाध्यायस्य पारायणम् अकुर्वन्। अग्रे महाविद्यालयस्य व्याकरणविभागस्य विभागाध्यक्षाः मान्याः डॉ. सङ्कर्षणपण्डामहाभागाः गीताजयन्त्याः माहात्म्यम् अवर्णयन्। तदनु अनुष्ठानस्य अस्य अध्यक्षाः डॉ. अमरेन्द्रकुमारमिश्रवर्याः स्ववचोभिः छात्रान् उद्बोधितवन्तः। अनुष्ठाने अस्मिन् साहित्यविभागस्य विभागाध्यक्षाः डॉ. नृसिंहनाथगुरुवर्याः, वेदान्तविभागस्य विभागाध्यक्षाः डॉ. दयानन्दपाणिग्राहिमहाभासामान्यरूपेणगाः, धर्मशास्त्रविभागस्य विभागप्रधानाः डॉ ₹₹० सुरञ्जनपाहाडीमहोदयाः, अन्ये धन्यवादम् अतिथ्यध्यापकाः च उपस्थिताः आसन्। अनुष्ठानस्य अस्य सञ्चालकानां डॉ दयानन्दप्राणिग्राहिमहाभागानां सञ्चालनकौशलबलाद् “ऊर्ध्वमूलमधः शाखम्” इति श्लोकमादाय सभासत्सु शास्त्रार्थ. अपि जातः। अन्ते धर्मशास्त्रविभागीयाः डॉ ० सुरञ्जनपाहाडीमहोदयाः विनिवेद्य इमां सभां समापितवन्तः।



# गीताजयन्त्युत्सवपरिपालनेन सर्वदर्शनमन्थनपरिषदः १०८ व्याख्यानमालासु षोडशतमं व्याख्यानं सुसम्पन्नम्

हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः, नलवारी, असमप्रदेशः। कुमारभास्करवर्म- संस्कृत–पुरातनाध्ययन- विश्वविद्यालयस्य मुख्यसभागारे सर्वदर्शनविभागेन सर्वदर्शनमन्थनपरिषदा च भव्यया शोभया “गीताजयन्तीसमारोहः” सम्यक् आयोजितः। गीताजयन्तीदिनेऽस्मिन् विश्वविद्यालये सर्वत्र आध्यात्मिक– सांस्कृतिक– शैक्षणिक– भावनानां सुमधुरसङ्गमः दृष्टः। समारोहस्य मुख्यवक्तारूपेण विश्वविद्यालयस्य आदारणीयाः कुलगुरवः वरिष्ठाचार्याः प्रो. रॉ. जोशी महोदयाः आमन्त्रिताः। ते “आधुनिकयुगे भगवद्गीता” इति अतिगभीरं विषयं समालम्ब्य गीतायाः सारभूतं मन्तव्यं बुद्धिलाघवेन सुबोधतया च प्रस्तुतवन्तः। भगवद्गीतायाः तत्त्वज्ञानम्, कर्मयोगस्य आधुनिकीकरणम्, भक्तेः वैश्विकमहत्त्वम्, तथा च नित्यजीवने आध्यात्मिकदृष्टेः अनिवार्यता इत्यादीन् विषयान् ते समासाद्य अस्याः प्रासङ्गिकतां विस्तरेण प्रतिपादितवन्तः। तेषां वक्तव्यं श्रोतृणां चेतसि दीर्घकालं निनादयति स्म।समारोहे उपस्थिता आसन् विश्वविद्यालयस्य कुलसचिवः प्रो. विकाशभार्गव महोदयः, शैक्षणिककुलसचिवः प्रो. ज्योतिराजपाठक महोदयः च। उभाभ्यां महोदयाभ्यां गीतायाः विश्वमानवसमुदाये उपदिष्टस्य सदाचार– नैतिकता– कर्तव्यपरायणता– समत्वभावस्य वैशिष्ट्यं संक्षेपेण विवृण्वता सभा विशेषरूपेण प्रेरिताभवत्।

तत्पूर्वं सर्वदर्शनविभागाध्यक्षः प्रो. रणजीतकुमारतिवारीमहोदयः समग्रान् अतिथीन् स्वागतं विधाय कार्यक्रमस्य उद्देश्यं च प्रकाशयामास। सर्वदर्शनविभागस्य शैक्षणिक– दार्शनिक– अनुसन्धानपरम्परायाः गौरवम्, गीताशास्त्रस्य विश्वपरम्परायां स्थानम्, तथा च आधुनिकत्वेनापि अध्यात्मस्य अपरीक्षितप्रभावः इत्यादीनि ते वक्तारः सूचयामासुः।विभागीयछात्रेण सोहन सुनारी इत्यनेन भगवद्गीतायाः भक्तियोगाध्यायात् चयनितं श्लोकपाठं सुन्दरस्वरेण कृत्वा समारोहस्य आध्यात्मिकभावनां वर्धितवान्। ततः विभागीयछात्रया सुमिदासेन भक्तिरसपूरितं श्रीकृष्णस्तुतिगीतं मधुरतः प्रगीय सर्वेषां मनांसि हर्षेण पूर्णानि कृतानि।कार्यक्रमस्य समचालनं विभागीयशोधच्छात्रेण लिराजकाफ्लेमहोदयेन। तेन च ततः धन्यवादवक्तव्यं निर्वह्य उपस्थितानां प्रति कृतज्ञतां प्रकाशयामास। सम्पूर्णकार्यक्रमे विश्वविद्यालयस्य नानाविभागाध्यक्षाः, प्राध्यापकवर्गः, सहायकाचार्याः, शोधार्थिनः, स्नातक–स्नातकोत्तरविद्यार्थिनश्च उल्लेखनीयं सहभागं कृतवन्तः। सर्वत्र सौहार्दस्य आध्यात्मिकतायाः, तथा च अध्ययनचर्चायाः उत्साहं द्रष्टुं लभ्यते स्म। एवं गीताजयन्तीसमारोहः ज्ञान– भक्ति– कर्म– योगानां समन्वयमिव सञ्जनयन् अत्यन्तं सफलतया समापितः।



# " बक-शफर्योः" संवादः

( अनुष्टुप् छंद )
न लब्ध्वाशफरीमेकां
बहुकाले स्थिते पदे।
श्लाघयामन्त्रयिष्यामि
बकोऽयमित्यशोचयत्।।१।।
कामिनि जलहारिणि
चंचले नवयौवने ।
मुक्ताकाशं तु दास्यामि
खल्वागच्छ जलात्परः।।२।।
ललितमांसलोभेन
व्योमदानेतिभाषसे।
वञ्चकोऽसि जन्मना त्वं
कृत्येनेति प्रकाशितम्।।३।।
शरीरेण हि शुभ्रोऽहम्
दर्शने बहुशोभनम्।
तथापि दत्तचित्तेन
शोच्यामि तव मुक्तये।।४।।
इदं शुभ्रशरीरं ते
कलुषोपरिच्छादनम्।
गच्छ! गच्छ! दुरात्मा रे
मिथ्यावादि प्रवञ्चकः।।५।।
शफर्या स्वविवेकेन
कृतं शरीररक्षणम्।
इत्थं निरुत्तरं प्राप्य
बकोऽयन्त्रपलायितः।।६।।
घोषणा - " बक-शफर्योः संवादः " शीर्षक रचना मम मौलिकाभिव्यक्तिः अस्ति। रचना अद्यतन अप्रकाशिता अस्ति।

**मोतीप्रसादः साहू**
motiprasadsahu@gmail.com
हाट्सएप - 9411703669

**मद्यमुक्त-भारतम्**



# सामसीमहाविद्यालये-गीताजयन्तीमहोत्सवः पालितः



**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः।** प्रतिवर्षमिव वर्षेऽस्मिन् अपि महाविद्यालये गीताजयन्तीमहोत्सवः आयोजितः।अस्मिन् जयन्तीमहोत्सवे श्लोकपाठः, प्रश्नोत्तरी स्पर्धा च कारिताः।छात्राणां प्रस्तुतिम् अवलोक्य सर्वे भृशम् आनन्दं प्राप्तवन्तः।अत्र त्रिंशतछात्राः भागग्रहणं कृत्वा पुरस्कारं लब्धवन्तः। प्राचार्यः डॉ.सलीलकुमारमुखार्जी छात्रान् गीता-अध्ययनाय जीवने आचरणाय च प्रेरितवान्।अवसरेऽस्मिन् अस्य महाविद्यालयस्य अध्यापकः डॉ.शिवप्रसादः वेहेरा गीतायाः परिचयम्, उपोयोगिता, महत्त्वं आध्यात्मिकदृष्ट्या , राजनैतिकदृष्ट्या , सामाजिकदृष्ट्या, मनोवैज्ञानिकदृष्ट्या,साहित्यदृष्ट्या च व्याख्यानं कृतवान् । डॉ. रामेश्वरमुखार्जी,डॉ. सुजितमजुमदारः, वावलुमुर्मु च वक्तव्यं दत्तवन्तः। इतोऽपि श्रीमती निलीमा सरकारः, श्रीमान् देवादिदेवः चक्रवर्ती, डॉ मेधाकुमारी, डॉ.देवमित्रा दासः, वरुणः तिरुआ, मौसुमी दत्तः , सुदेवसरकारः , सञ्जयकर्मकारः च उपस्थिताः आसन्।डॉ मेधाकुमारी कार्यक्रमस्य परिचालिका आसीत् । धन्यवादज्ञापनं कृतवती संस्कृतविभागाध्यक्षा श्रीमती निलीमा सरकारः । अन्ते शान्तिमन्त्रेण कार्यक्रमः सम्पन्नः कृतः।




**कैथल-: गीताजयन्त्योपलक्ष्ये सांस्कृतिके कार्यक्रमे राजकीयवरिष्ठ-माध्यमिकविद्यालयः, कठवाड़ इत्यस्य छात्राः जिला-उपायुक्तेन सम्मानिताः**



**गीता जयन्त्याः सुअवसरे राजकीय वरिष्ठ माध्यमिक विद्यालय टौणीदेव्यां कार्यरतः संस्कृत-अध्यापकः राजेशकुमारः त्रिंशत् छात्रान् श्रीमद्भगवद्गीताः उपहाररूपेण वितरणं कृतवान्।**



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

नन्दिनीः नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्याः नमस्ते नन्दिनि। अद्य मया एका विशिष्टा भौतिक-विज्ञान-वार्ता पठिता। अनुसन्धातृभिः दृष्टं यत् प्रकाशेन सह ग्रथिताः अणवः शक्तिमन्तं सङ्केतं प्रेषयन्ति। अनेन आविष्कारेण यन्त्राणां कार्यक्षमता वर्धिता भविष्यति।
नन्दिनीः अहो, प्रकाशस्य एतादृशी शक्तिः पूर्वं न ज्ञाता अभूत्। विज्ञानस्य एषा नूतना उपलब्धिः। परं मया श्रुतं यत् उदर-समस्यानां निवारणाय अपि वैज्ञानिकैः किञ्चित् सरलं समाधानं प्राप्तम्?
काव्याः आम नन्दिनि। अनुसन्धातृभिः षण्णवति-सहस्र-जनानाम् अध्ययनं कृतम्। तैः दृष्टं यत् यदा जनैः फलं शाकं च स्वीकृतं, तदा मलावष्टम्भः (constipation) निवारितः। एषः उपायः बहु-जनानां कृते लाभदायकः अभूत्।
नन्दिनीः औषधं विना केवलं पथ्य-भोजनेन स्वास्थ्यं रक्षितम्, एतत् तु अति-श्लाघनीयम्। श्रूयते यत् हृदय-आघातं प्राप्तवतां कृते अपि काचित् विशिष्टा 'पट्टिका' निर्मिता?
काव्याः सत्यं पृष्टं त्वया। वैज्ञानिकैः काचित् 'सूक्ष्म-सूचि-पट्टिका' (micro-needle patch) आविष्कृता। अनया पट्टिकया साक्षात् क्षत-स्थाने औषधं दत्तम्। एवं क्षतिग्रस्तं हृदयेन पुनः स्वस्थावस्था प्राप्ता।
नन्दिनीः चिकित्सा-विज्ञानस्य एषा प्रगतिः अद्भुता। किन्तु कृषिक्षेत्रे अपि किमपि नूतनम् अनुसन्धानं जातम्? मया श्रुतं यत् गोधूम-विषये कश्चित् विशेषः वर्तते।
काव्याः बाढम्। वैज्ञानिकैः एकं विचित्रं गोधूम-बीजं निर्मितम्। तेन बीजेन मृत्तिकायां भूयाति-स्थापन-जीवाणुः प्रेरितः। अतः कृत्रिम-उर्वरकस्य आवश्यकता न्यूना जाता। अनेन कृषिकर्म सुकरम् अभूत्।
नन्दिनीः एतत् तु कृषिकाणां कृते अति-उत्तमम्। अद्य एतावान् एव समयः। धन्यवादः काव्ये।
काव्याः धन्यवादः नन्दिनि। नमो नमः।